# अात्रेय शिक्षा

कारिकां संप्रवक्ष्यामि प्रथमः पारिभाषिकम्
संहिताविषयवेदपारायणफलन्तथा १
पारायणक्रमञ्चैव वाग्वृत्तिः पदलक्षणम्
क्रमस्याथ जटायाञ्च केवलवर्णक्रमस्य क २
लक्षणञ्च क्रमात्तत्र यौ च द्वित्वागमस्मृतौ
तयोरभिनिधानस्य केवलाख्यागमस्य च ३
यमानन्तनिषेधानं द्वित्वागमनिषेधयोः
लक्षणं स्वरभक्तीनां सोदाहरणसंज्ञिकाः ४
विवृत्ते लक्षणन्तस्यां संज्ञोदाहरणानि च
व्यक्तिमध्यस्थनासिक्यः रंगाख्यप्लुतदीर्घयोः ५
लक्षणं स्वरितोदात्तकम्पानञ्च विशेषतः
स्याद्वैकृतप्राकृतयोः नासिकौ रस्ययोरपि ६
फलञ्च जिह्वामूलीय्योपध्मानीयाख्ययोरपि
स्थितिसन्धिविधिश्चैव तथा प्रणवलक्षणम् ७
स्वरवर्णक्रमस्तत्रोदात्तादीनां निरूपणम्
उदाहरणसंयुक्तसप्तस्वरितलक्षणम् ८
तत्प्रयत्नप्रदेशाञ्च मात्रावर्णक्रमस्तथा
मात्रामाननिरूपञ्च मात्राकालोक्यिविध्यपि ९
अंगवर्णक्रमस्तत्र परपूर्वांगलक्षणम्
अंगवर्णक्रमात्तञ्च सुस्पष्टं लक्षणन्ततः १०
निर्वचनं सवर्णसारभूतवर्णक्रमस्य तु
संधोचवर्णधर्माणां तदुक्तेरानुपूर्विका ११
भक्त्यनुस्वारकंपानां रंगस्याप्युक्ति लक्षणम्
शब्दोत्पत्तिप्रकारञ्च तत्र ध्वनिनिरूपणम् १२
शरीराभार्गतन्तत्र सर्वव्यापारलक्षणम्
जाठरान्तिस्थिभिः पञ्चवायूनां स्थानचेष्टिकाः १३

लवनिभेदास्तत्र जातवर्णानाञ्च विनिश्चयः
तेषांतु स्थानकरणविवेकस्तत्प्रकारकः १४
प्रयत्नभेदान्वर्णानां देवताजातिसंज्ञिकाः
उदात्तादिस्वराणाञ्च देवताजातयो गुणाः १५
ततो हस्तस्वरन्यासलक्षणन्तस्य तत्फलम्
अंगाद्यवस्था षड्जाति सप्तस्वरनिरूपणम् १६
उदात्तादि स्वरोत्पत्तिर्वेदस्य महिमा ततः
विर्ङ्कत्वष्टकसंयुक्ते वेदस्याध्ययने फलम् १७
इत्येवमानुपूर्व्येण शीक्षा संप्रोच्यतेऽधुना १८
इत्यात्रेयशिक्षाकारिका समाप्ता

प्रथमाः श्लोकाः

आम्नाया यस्य निःश्वासाश्चन्द्रसूर्यौ च चक्षुषी
तत्प्रणम्य परंज्योतिः शिक्षां वक्ष्यामि निर्मलाम् १
अचः स्वरा इति प्रोक्ता व्यञ्जनानि हलः स्मृताः
ह्रस्वदीर्घप्लुतावर्णौ वर्णौ वर्णा ऋ ॠ लृ च २
अदैदोदौदिति ज्ञेयाः षोडशेहोदिताः स्वराः
कखौ गघौ ङचछजा झञौ टठडढा णतौ ३
थदौ धनौ पफबभा मः स्पर्शाः पञ्चविंशतिः
यरौ लवौ चतस्त्रोऽन्तस्थाश्चः कशषसः पहाः ४
षडूष्मानो विसर्गोऽनुस्वारो ङो नास्यपञ्चकम्
इत्येते याजुषा वर्णा एकोना षष्टिरीरिताः ५

अन्तिमाः श्लोकाः

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः
स्वरितः कण्ठमूलीयः सर्वाङ्गे प्रचयः स्मृतः २८१

ॠङ्गमात्रादयो धर्माः पूर्वमेवोदिताश्च ये
तान्सर्वान् वर्णसारेऽस्मिन् तत्र तत्र प्रयोजयेत् २८२
एवं सलक्षणं वेदं योऽधीतेऽध्यापयत्यपि

वेदांश्च श्रोत्रियं ब्रह्म ये के दुष्यन्ति मानवाः
तेघोरं नरकं प्राप्यजायन्ते भुवि सूकराः २९३
वेदरूपविलसत्परात्परं ये पठन्ति विधिना द्विजोत्तमाः
ते त्रिवर्गमिह चानुभूय तच्छाश्वतं पदमवाप्नुयुः परम् २९४

इत्यात्रेयशिक्षामूलं संपूर्णम्